*'मन की बात' [३६]*

"मनोगतम्" [३६] (प्रसारण-तिथिः- 24.09.2017)

["मन की बात"- "मनोगतम्" - इति कार्यक्रमस्य संस्कृत-भाषिकानुवादः ]

- भाषान्तर-कर्ता - डॉ. बलदेवानन्द सागर

मम प्रियाः देश-वासिनः !

भवद्भ्यः सर्वेभ्यः नमस्कारः | आकाशवाणी-माध्यमेन 'मन की बात' इति 'मनोगतम्' प्रसारयन् वर्ष-त्रयं पूर्णतां नीतवान् | अद्य इदं षट्-त्रिंशत्तमम् आख्यानं वर्तते | 'मन की बात' इति प्रसारणं हि, भारतस्य सकारात्मक-शक्त्या, देशस्य प्रत्येकमपि कोणेषु संभरिताभिः भावनाभिः, इच्छाभिः, अपेक्षाभिः, कुत्रचिच्च परिदेवनैः, समुच्छलद्भिः जनानां मनोभावैः च, साकं मां संयोजितवत् | अमुना प्रसारण-व्याजेन एतैः सर्व-विध-भावैः साकं आत्मानं संयोजयितुम् अद्भुतमेकम् अवसरमहं प्राप्तवान् | नाहं कदापि एतद् अवोचम् यत् इदं हि मम मनोगतं वर्तते | इदं मनोगतं हि देशवासिनां मनोभिः मनोभावैः च सार्धं संपृक्तम् अस्ति | तेषाम् आशाभिः अपेक्षाभिः च साकं संपृक्तं वर्तते | मनकी बात-प्रसारणे यान् विषयान् अहं प्रस्तौमि, ते विषयाः देशस्य प्रायेण प्रत्येकमपि कोणेभ्यः जनैः प्रेषितेषु विविध-विषयेषु प्रायेण अन्यतमान् कांश्चन एव अत्र उपस्थापयितुं प्रभवामि, परञ्च अहन्तु बहु लाभान्वितो भवामि | भवतु नाम ईमेल्-माध्यमं वा दूरभाष-सन्देशः, आहोस्वित् भवतु Mygov, वा NarendraModiApp - इति, एतान् विविधान् विषयान् अहम् अवाप्नोमि | एतेषु अधिसंख्यन्तु मह्यं प्रेरणादायि एव, अधिकतमाः च विषयाः भवन्ति प्रशासन-परिष्कारार्थम् | तेषु कुत्रचित् कानिचित् वैयक्तिकानि परिदेवनानि अपि भवन्ति, कुत्रचिच्च सामूहिक-समस्यायाः कृते ध्यानम् आकृष्यते | तथा च, अहन्तु मासे एकवारमेव अर्ध-होरामितं कालं यापयामि भवद्भिः साकम्, परन्तु

जनास्तु त्रिंशद्दिनानि यावत् “मन की बात”- इति विषयमाधृत्य स्व-स्व-मनोगतानि प्रेषयन्ति | परिणामत्वेन सर्वकारः अपि संवेदनशीलः सञ्जातः, समाजस्य दूर-सुदूर-वर्त्तिषु स्थलेषु कीदृश्यः शक्तयः वर्तन्ते इति अवगन्तुम्, सहजतया अनुभवितुम्, अवधातुञ्च पार्यते | अत एव, मन-की-बात-प्रसारणस्य त्रयाणां वर्षाणां यात्रेयं देशवासिनां भावानाम्, अनुभूतीनां चैका दीर्घा यात्रा वर्तते | स्याद् एतावति अल्पकाले एव, देशस्य सामान्य-जनानां मनोभावान् अवगन्तुं बोद्धुञ्च यमवसरमहं लब्धवान्, तदर्थं देशवासिनां हार्दं कार्तज्ञ्यमावहामि | “मन-की-बात-प्रसारणे अहं सर्वदा आचार्य-विनोबा-भावे-वर्यस्य तत् वक्तव्यं संधारितवान्, यदनुसारं “अ-सरकारी, असरकारी” भवति - इति आचार्य-भावे सर्वदा कथयति स्म | अहमपि “मन-की-बात”-प्रसारणे अस्य देशस्य जनं केन्द्रीकर्तुं प्रयतितवान् | राजनीतितः एतत् पृथगेव स्थापितम् | तात्कालिकः आवेगः आवेशो वा भवति, तयोः प्रभाव-राहित्येन भूत्वा स्थिरमनसा भवद्भिः साकम् आत्मानं संयोजयितुं प्रयतितवान् | नूनमहं विश्वसिमि यत् साम्प्रतं वर्ष-त्रयानन्तरं समाज-शास्त्रिणः, विश्व-विद्यालयाः, अनुसन्धातृ-विद्वान्सः, सञ्चार-माध्यमानां निष्णाताः च विषयमेनं नूनं विश्लेषयिष्यन्ति | गुणावगुण-जातं विस्तरेण प्रकाशयिष्यन्ति | अपि च, विश्वसिमि यत् एतादृक्-विचार-विमर्शः भविष्यति काले “मन-की-बात”-प्रसारणस्य कृतेऽपि अतितरामुपयोगी सेत्स्यति | अत्र अभिनवैका चेतना, नवीना चोर्जा प्राप्स्येते | मया एकदा प्रसारणेऽस्मिन् प्रोक्तमासीत् यत् भोजन-समये यावत् खाद्य-वस्तु अपेक्षितमस्ति तावदेव आदेयम्, न किञ्चिदपि अपक्षरणीयम् | परञ्च अनन्तरं मया अवलोकितं यत् देशस्य प्रत्येकमपि कोणेभ्यः अनेकानि पत्राणि प्राप्तानि, नैकानि सामाजिक-संघटनानि, बहवो युवकाः च पूर्वतः एव, अस्मिन् कर्मणि निरताः वर्तन्ते | यत्-किमपि अन्नं स्थाल्यां परित्यक्तं तत्-सर्वं समेत्य तस्य सदुपयोगः कथं स्यादिति कृत्वा कार्यकर्तारः तावन्तो जनाः मम दृष्टि-पथमागताः यत् साम्प्रतं तद्-विचिन्त्य मम मानसं प्रसीदतितराम्, संतोषाधिक्यम्, आनन्द-सन्दोहञ्च अनुभवामि |

एकदा अहं “मन-की-बात”-प्रसारणे महाराष्ट्रस्य सेवानिवृत्तं शिक्षकं श्री-चन्द्रकान्त-कुलकर्णीं संदर्भितवान्, यो हि षोडश-सहस्र-रूप्यकात्मकात् स्वीय-सेवानिवृत्ति-वेतनात् पञ्च-सहस्र-रूप्यकात्मकानि एक-पञ्चाशन्मितानि उत्तर-दिनयुतानि धनादेश-पत्राणि स्वच्छता-हेतोः दानराशित्वेन प्रादात् | अपि च, ततः परं मया दृष्टं यत् स्वच्छतायै एवंविध-कार्यानुष्ठानाय बहवो जनाः पुरतः समायाताः |

एकदा अहं हरियाणा-राज्यस्य अन्यतमस्य सरपञ्चस्य ‘selfie with daughter’ इति दुहित्रा साकं स्वीयादत्त-चित्रम् अपश्यम्, विषयोऽयम् अहं “मन-की-बात-प्रसारणे सर्वेषां समक्षम् उपस्थापितवान् | सत्वरं पश्यता एव, न केवलं भारते, अपि तु, विश्वस्मिन्नपि विश्वे, ‘selfie with daughter’ इत्येकं बृहदभियानं प्रावर्त्तत | नायं विषयः केवलं सामाजिक-माध्यमानामेव वर्तते | प्रत्येकमपि दुहित्रे नूतन-विश्वासस्य प्रदात्री, अभिनव-गरिम्णः चोद्भावयित्री घटनैषा सिद्धा | प्रत्येकमपि पितरौ अनुभवितुमारभतां यत् स्वीय-दुहित्रा साकं वयमपि स्व-चित्रमानयेम ! प्रत्येकमपि कन्या अनुभवितुमारभत यन् ममापि किमपि विशिष्टं माहात्म्यमस्तीति |

विगतेषु दिनेषु भारत-सर्वकारस्य पर्यटन-विभागेन सहोपवेशने आसम् | तदा पर्यटन-समुत्सुकाः जनाः मया सूचिताः यत्ते अतुल्य-भारतस्य पर्यटनार्थं यत्र-कुत्रापि गच्छेयुः, तत्रत्यानि चित्राणि अवश्यं प्रेषयेयुः | लक्षशः चित्राणि, भारतस्य विविध-कोणानां चित्राणि च संप्राप्तानि, तानि पर्यटन-क्षेत्रे कार्यनिरतानां कृते न्यास-निधित्वेन सिद्धानि सन्ति | लघ्वी एव घटना कियत् बृहदाकारयुतम् आन्दोलनं प्रवर्तयितुं प्रभवति - इति तु मया “मन-की-बात”-प्रसारणेन अनुभूतम् | अद्य एवम् अन्वभवम्, यतो हि यदा विचारयन् आसं यत् वर्ष-त्रयं पूर्णम्, तदा विगत-वर्ष-त्रयस्य अनेकाः घटनाः मम मानसे प्रतिभासिताः जाताः | देशोऽयं समुचित-दिशं प्रति अग्रेसर्तुं प्रतिपलं सन्नद्धोऽस्ति | देशस्य प्रत्येकमपि नागरिकः अन्येषां लाभार्थम्, समाजस्य भद्रत्वाय, देशस्य प्रगतये च यत्किञ्चिदपि शक्यं, तत्कर्तुं समीहते | इदं हि अहं वर्ष-त्रयस्य मम “मन-की-बात ”-प्रसारणस्य

अभियानेन देशवासिभ्यः अवगन्तुं, प्रबोद्धुं, शिक्षितुञ्च अपारयम् | कस्यापि देशस्य कृते इदं हि महत्वाधायि-पुञ्जीत्वेन भवति, एका बृहती शक्तिः भवति | हृदयेनाहं देशवासिभ्यः नमामि |

एकवारमहं "मन-की-बात"-प्रसारणे खादी-विषयं चर्चितवान् | तथा च, खादी नाम नैव किमपि वस्त्र-जातम् , अपि तु एतत्तु विचार-तन्तु-रूपम् | मया अवलोकितं यदद्यत्वे खादीं प्रति जनानां महती रुचिः प्रवर्धितास्ति | अहञ्च स्वाभाविकतया अकथयं यत् खादीधारिणं भवितुं नाहं साग्रहं कथयामीति | परञ्च यदा अनेक-विधानि पटानि भवन्ति चेत् तदा खादी-पटं कथन्नु भवेत् ? गृहे भवतु नाम आस्तरणम् वा कर-प्रोञ्छनम् वा यवनिका वा तिरस्करिणी | इदमनुभूयते यत् युवप्रसूतिः खादीं प्रति समधिका आकृष्टा वर्तते | खादी-विक्रयः एधितोऽस्ति | एतस्मात् कारणाच्च निर्धनस्य गृहे साक्षात् वृत्तितायाः सम्बन्धः संयोजितो जातः | ओक्टोबर-मासे द्वितीय-दिनाङ्कात् खादी-क्रयणे व्यवकलनं प्रदीयते, पर्याप्तं व्यवकलनम् प्राप्यते | पुनरेकवारम् अहं साग्रहं कथयामि यत् खादी-अभियानं यत् प्रवर्तितं तद् वयम् इतः परमपि अग्रेसारयेम प्रवर्धयेम च | खादीं क्रीत्वा निर्धनस्य गृहे दीपावल्याः प्रदीपं प्रज्वालयेम - एतादृशं भावं मनसि निधाय वयं कार्याणि करवाम ! अस्माकं देशस्य निर्धनः अमुना कार्येण शक्तिं प्राप्स्यति, तथा चैतत् अस्माभिः अवश्यमेव करणीयम् | खादीं प्रति जनानां रुचि-संवर्धनात् खादी-क्षेत्रे कार्यनिरतेषु, भारत-सर्वकारे च खादी-सम्बद्धेषु जनेषु नूतनरीत्या विचार-परिशीलनस्य समुत्साहः अपि वर्धितोऽस्ति | नवीनं प्रविधिं केन प्रकारेण आनयेम ? उत्पादन-क्षमतां केन प्रकारेण प्रवर्धयेम ? सौर-हस्तवेम-यन्त्राणि केन प्रकारेण प्रयुञ्ज्महि ? प्राचीनं रिक्थं यद्धि विंशतेः पञ्च-विंशतेः त्रिंशतेः च वर्षेभ्यः पिहितं संतिष्ठते, तत् केन प्रकारेण पुनर्जीवितं स्यादिति ?

उत्तर-प्रदेशे वाराणस्यां सेवापुरे खादी-आश्रमः विगतेभ्यः षड्-विंशति-वर्षेभ्यः पिहितः आसीत्, स च साम्प्रतं पुनर्जीवितो जातः | अत्र अनेकाः प्रवृत्तयः संयोजिताः सन्ति | अनेके जनाः आजीविकायाः अभिनवान् अवसरान्

अवाप्नुवन् | कश्मीरे पम्पोर-स्थले खादी-ग्रामोद्योगः स्वीयं निष्क्रियं प्रशिक्षण-केन्द्रं पुनः सक्रियं व्यदधात् | तथा च, क्षेत्रेऽस्मिन् अनेकविधं प्रदातुं कश्मीरस्य पार्श्वे सुबहु वर्तते | सम्प्रति अस्य प्रशिक्षण-केन्द्रस्य पुनः कार्याचरणेन नूतनायै प्रसूतये, आधुनिक-रीत्या निर्माण-कार्यानुष्ठानाय, वयनाय, नवानां वस्तूनां संरचनायै च महत्-साहाय्यम् अवाप्स्यते | अहञ्च भद्रतरम् अनुभवामि यत् दीपोत्सवावसरे यदा बृहन्ति नैगम-गृहाणि उपहारान् प्रयच्छन्ति तदा सम्प्रति एतानि खादी-वस्तूनि प्रदातुम् आरभन्त | जनाः अपि अन्योन्यम् उपहारत्वेन खादी-वस्तूनि प्रदातुम् आरब्धवन्तः | निसर्गतः वस्तु-जातं केन प्रकारेण अग्रेसरति - इति वयं सर्वे अनुभवामः |

मम प्रियाः देशवासिनः ! विगते मासे मन-की-बात-प्रसारणावसरे वयं संकल्पितवन्तः निर्णीतवन्तः च यत् गान्धि-जयन्त्याः पूर्वं पञ्चदश-दिनानि यावत्, अशेष-देशे स्वच्छतायाः उत्सवम् आयोजयिष्यामः | स्वच्छतया साकं प्रत्येकमपि जन-मानसं संयोजयिष्यामः | अस्मदीयाः आदरणीयाः राष्ट्रपति-वर्याः कार्यमिदमारभन्त, तथा च, संपूर्णोऽपि देशः संपृक्तो जातः | आबाल-वृद्धाः, भवन्तु नाम पुरुषाः वा महिलाः, भवतु नाम ग्रामः वा नगरम्, प्रत्येकमपि जनः साम्प्रतं अस्य स्वच्छताभियानस्य अङ्गत्वेन कार्याणि आचरति | तथा च, यदाहं कथयामि यत् “संकल्पतः सिद्धि-पर्यन्तम्”, एतत् स्वच्छताभियानं “संकल्पतः सिद्धि-पर्यन्तम्”, केन प्रकारेण अग्रेसरति - इति तु वयं निज-नेत्राभ्यां पश्यामः | प्रत्येकमपि जनः एतत् स्वीकरोति, सहयोगमाचरति, एनत् साकारीकर्तुं यत्-किञ्चिदपि योगदानं विदधाति | अहम् आदरणीयस्य राष्ट्रपतेः कार्तज्ञ्यन्तु आवहामि एव, युगपदेव, देशस्य प्रत्येकमपि वर्गः एनत् नैजमेव कार्यम् आमन्यत, प्रत्येकमपि जनः अमुना संपृक्तो जातः, भवन्तु नाम ते क्रीडा-जगतः जनाः वा चलचित्र-जगतः कलाकाराः, स्युः वा शिक्षाविदो वा विद्यालयीयाः वा महाविद्यालयीयाः विश्वविद्यालयीयाः वा, भवन्तु नाम कृषकाः वा श्रमिकाः, आहोस्वित् अधिकारिणो वा लिपिकाः, रक्षि-कार्मिकाः वा सैनिकाः - प्रत्येकमपि अमुना साकं संयुक्तः अभवत् | सार्वजनिकेषु स्थानेषु एकप्रकारकः आपीडोऽपि

समुद्भूतः यत् इतः परं सार्वजनिक-स्थानानि मलीनीक्रियन्ते चेत् जनाः व्याक्षिपन्ति, तत्तत्-स्थलेषु कार्य-नियुक्ताः जनाः अपि एवंप्रकारकम् आपीडम् अनुभवितुमारभन्त । अहमेनत् भद्रत्वाय कल्पयामि । प्रसीदामितराञ्च यत् “स्वच्छता एव सेवा”- इत्यभियानस्य केवलं आरम्भिकेषु चतुर्षु एव दिनेषु प्रायेण पञ्च-सप्तति-लक्षतोऽपि अधिकाः जनाः, चत्वारिंशत्-सहस्राधिकान् प्रारम्भिकोपायान् आलक्ष्य कार्य-कलापेषु संलग्नाः अभूवन् । मया अक्षि-लक्ष्यी-कृतं यत् केचन जनाः तु अनारतं कार्याणि कुर्वन्ति, परिणामोन्मुखीनि कर्माणि आचरन्ति, कालेऽस्मिन् अपरं तथ्यमेकम् अपि अनुभूतम्, एकं नाम भवति यद् वयं स्वच्छताम् आचरेम, अपरञ्च भवति यद् वयम् सावधानं मालिन्यं नैव प्रसारयेम, परञ्च यदि वयं स्वच्छतां स्वीय-स्वभावत्वेन स्वीकर्तुं वाञ्छेम चेत् एकं  वैचारिकान्दोलनमपि आवश्यकं भवति । अस्मिन् क्रमे “स्वच्छता एव सेवा”- इत्यनया साकं काश्चन स्पर्धाः अपि सम्पन्नाः । सार्ध-द्विकोट्यधिकाः बालाः स्वच्छता-निबन्ध-स्पर्धासु सहभागित्वम् आवहन् । लक्षशो बालाः चित्राणि विरचितवन्तः । स्व-स्व-कल्पनानुसारेण ते स्वच्छता-विषयकाणि चित्राणि निर्मितवन्तः । अनेके जनाः कविताः अलिखन् । एतेषु दिनेषु सामाजिक-सञ्चार-माध्यमेषु अस्मदीयैः लघु-लघुभिः बालकैः प्रेषितानि चित्राणि तानि अहं संप्रेषयामि, संस्थापयामि च, तेषाञ्च गौरवं गायामि । स्वच्छता-सन्दर्भे संचार-माध्यमिकानां कृते कार्तज्ञ्यं प्रकटयितुं न कदापि विस्मरामि । ते पावित्र्य-पुरस्सरम् आन्दोलनमेनत् अग्रेसारितवन्तः । स्व-स्व-पद्धत्या ते संयुक्ताः सञ्जाताः,, अपि च, सकारात्मकं परिवेशं विनिर्मातुं ते सुबहु योगदानं कृतवन्तः, तथा च, अधुनापि ते निज-रीत्या स्वच्छतायाः आन्दोलनस्य नेतृत्वं कुर्वन्ति । अस्माकं देशस्य वैद्युताणविक-सञ्चार-माध्यमानि, मुद्रण-माध्यमानि च कियतीं महतीं सेवां कर्तुं प्रभवन्ति - इति तु “स्वच्छता एव सेवा”- इत्यान्दोलने वयम् अवलोकयितुं शक्नुमः ।

नातिचिरं केनचिदहं श्रीनगरस्य अष्टादश-वर्षीयस्य युवकस्य बिलाल-डारस्य विषये संसूचितः । भवन्तः एतत् श्रुत्वा प्रसन्न्ताम् अनुभविष्यन्ति

यत् श्रीनगर-नगर-निगमः स्वच्छतायाः कृते बिलाल-डारं स्वीय-स्वच्छता-दूतरूपेण संमानितवान् | तथा च, मण्डित-दूतस्य विषयः प्रस्तूयते तदा भवन्तः विचारयन्ति यत् सम्भवतः सः कश्चन चलचित्र-जगतः कलाकारः भवेद् वा क्रीडा-जगतः कश्चन नायको वा भवेत् | मनागपि एवं नास्ति ! बिलाल-डारः विगतेभ्यः पञ्च-षड्भ्यो वर्षेभ्यः अर्थात् स्वीय-द्वादश-त्रयोदश-वर्षीयायुषा स्वच्छता-कार्येषु व्यापृतः अभवत् | एशिया-क्षेत्रस्य बृहत्तमं सरोवरं श्रीनगरं समीपम्, तत्र भवतु नाम अभिगट्यम् वा अभिगट्य-स्यूतानि, वा प्रक्षिप्ताः कूपिकाः वा प्रकीर्णानि अवकरादीनि वस्तूनि भवन्तु, सः सुतरां सततञ्च स्वच्छी-करोति | एतस्मात् कार्यात् किञ्चिद् धनार्जनमपि करोति, यतो हि तस्य पिता कर्कट-रोग-कारणात् बिलाल-डारस्य अल्पीयसि वयसि एव प्राणान् अत्यजत् | परञ्चायं निज-जीवनम् आजीविकया सहैव स्वच्छतया संयोजितवान् | अनुमानस्यानुसारेण बिलालः वर्षावधौ द्वादश-सहस्राधिक-किलोमितम् अवकरं स्वच्छीकरोति | श्रीनगर-नगर-निगममपि वर्धापयामि यत् अनेन स्वच्छतां प्रति प्राथमिकताधारेण कार्याणि कुर्वन्तं स्वच्छता-दूतरूपेण परिकल्प्य उदाहरणं प्रतिष्ठापितम्, यतो हि श्रीनगरं नाम सुख्यातं पर्यटन-स्थलम्, हिन्दुस्थानस्य प्रत्येकमपि नागरिकः श्रीनगरं गन्तुं नितरां समीहते, तत्र स्वच्छता-विषयः एतावता अवधानेन स्वीक्रियते - इदं हि अवश्यं प्रशस्यं कार्यम् | एतदालक्ष्य अपि अहं प्रसीदामितरां यत् बिलालः न केवलं तैः स्वच्छता-दूतत्वेन सम्मानितः, अपि तु, अस्मै स्वच्छता-कर्मिणे बिलालाय निगमेन साम्प्रतं यानमपि प्रदत्तम्, गण-वेषोऽपि उपायनीकृतः, अधुना असौ इतर-स्थानानि अपि गत्वा स्वच्छता-विषये जनान् शिक्षयति, प्रेरयति, प्रोत्साहयति च, परिणामावाप्तिं यावच्च, सततम् अनुवर्तते | वयसा अल्पोऽपि बिलाल-डारः स्वच्छतायां रुचिमतां सर्वेषां कृते प्रेरणामूलं वर्तते | अहं बिलाल-डारं भूरिशो वर्धापयामि |

मम प्रियाः देशवासिनः ! तथ्यमेतत् अस्माभिः नूनं स्वीकर्तव्यं भविष्यति यत् भावि इतिवृत्तम्, इतिवृत्तस्य कुक्षितः एव जायते, तथा च, यदा इतिवृत्तं सन्दर्भ्यते तदा महापुरुषाणां स्मरणं सहजं भवति | ओक्टोबर-मासो

नाम अस्मदीयानां महापुरुषाणां स्मृति-मासः वर्तते | महात्म-गान्धितः सरदार-पटेल-पर्यन्तम् अस्मिन्नेव ओक्टोबर-मासे एतावन्तः महापुरुषाः अस्माकं समक्षं सन्ति, यैः विंशत्येकविंशयोः शताब्दयोः कृते अस्मभ्यं मार्गदर्शनं कृतम्, अस्मान् सन्नीतवन्तः, देशस्य अस्मिता-रक्षणार्थम् अनेकविधानि कष्टानि सोढवन्तः | ओक्टोबर-मासीये द्वितीय-दिने महात्म-गान्धिनः लाल-बहादुर-शास्त्रिणः च जन्म-जयन्ती वर्तते, अपरतः एकादशे दिनाङ्के जयप्रकाश-नारायणस्य नानाजी-देशमुखस्य च जन्म-जयन्ती अस्ति, तथा च, मासेऽस्मिन् पञ्चविंशे दिने पण्डित-दीनदयाल-उपाध्यायस्य जयन्ती वर्तते | अथ च, नानाजी-दीनदयाल-वर्ययोः इदं हि शताब्द-वर्षमपि वर्तते | एतेषां महापुरुषाणां जीवनस्य केन्द्र-बिन्दुः किमासीत् ? एतेषु एकं सामान्यत्वेन अवर्तत, तदासीत् यत् देशस्य कृते जीवनम्, देशस्य कृते चावश्यं किञ्चित् आचरणीयमिति ! केवलम् उपदेश-प्रदानेन एव नैव, अपि तु जीवनाचरण-द्वारा प्रदर्शनीयमिति | महात्म-गान्धी, जयप्रकाश-जी, दीनदयाल-जी चेत्यादयः तादृशाः महापुरुषाः सन्ति, ये प्रशासन-पदेभ्यः अतितरां दूरे स्थित्वा, जनजीवनेन साकं प्रतिपलं यापितवन्तः. संघर्षं कृतवन्तः, तथा च, “सर्वजन-हिताय, सर्व-जन-सुखाय” किञ्चित्-किञ्चित् अनारतम् आचरितवन्तः | नानाजी-देशमुखः राजनीतिकं जीवनं त्यक्त्वा ग्रामोदय-कार्येषु व्यापृतः अभवत्, अथ च, तस्य शताब्द-वर्षस्य आयोजनावसरे, तस्य ग्रामोदय-कार्याणि प्रति आदराभिव्यक्तिः सुतरां स्वाभाविकी एव |

भारतस्य पूर्व-राष्ट्रपतिः श्रीमान् अब्दुल-कलामः यदा यदा नव-युवभिः संभाषमाणः आसीत् तदा सर्वदैव नानाजी-देशमुखस्य ग्रामीण-विकास-कथाः कुर्वन्नासीत् | सुबहु आदर-पुरस्सरं तस्योल्लेखं कुर्वन् अवर्तत | सः स्वयमपि नानाजी-वर्यस्य इमानि कार्याणि अवलोकयितुं ग्रामाणां दीर्घां यात्राम् अकरोत् |

दीन-दयालोपाध्यायः अपि, यथा महात्म-गान्धी समाजस्य अन्त्य-प्रान्ते स्थितानां जनानां कृते चिन्तयन्नासीत्, तद्वद् शिक्षया, वृत्तितया च केन प्रकारेण निर्धनानां पीडितानां शोषितानां वञ्चितानां च जीवनं समुन्नेतुं शक्येत

इति चर्च्यमाणः अवर्तत | एतेषां सर्वेषामपि महापुरुषाणां स्मरणं हि, तान् प्रति न कश्चन उपकारः | आगामि-मार्ग-प्रदर्शनं स्यात्, भावि-दिग्-बोधश्च भवेदिति कृत्वैव वयं एतान् स्मरामः नमामश्च |

आगामिनि “मन-की-बात”-प्रसारणे अहम् अवश्यं सरदार-वल्लभ-भाई-पटेल-विषये कथयिष्यामि, परञ्च ओक्टोबर-मासान्ते अशेष-देशे Run for Unity- इति ‘एक-भारतम् - श्रेष्ठ-भारतम्’ आमान्यते | देशस्य प्रत्येकमपि नगरे, प्रत्येकमपि पुरे च बृहत्यां मात्रायां Run for Unity-कार्यक्रमाः आयोजनीयाः | अपि च ऋतुरपि तादृशः अनुकूलः येन धावनं सुखदं सुकरञ्च भवति - सरदार-वर्य-सदृशीं लौहशक्तिम् अधिगन्तुम् एतादृक्-धावनमपि परमावश्यकम् | सरदार-पटेलः राष्ट्रमेकसूत्रे संग्रथितवान् | अस्माभिरपि एकतायै धावित्वा एकतामन्त्रः अग्रेसारणीयः |

वयं नितरां स्वाभाविकतया वदामः यत् विविधतासु एकता नाम भारतस्य विशेषता इति | विविधता-विषयकं गौरवमपि अनुभवामः, परञ्च किं कदाचित् भवन्तः एनां विविधताम् अनुभवितुं प्रायतन्त ? अहं पुनः पुनरपि निज-देशवासिनो वक्तुमीहे, विशेषेण च युवजनान् कथयितुमिच्छामि यत् वयं जागृतावस्थायां वर्तामहे | एतादृक्-भारतस्य विविधताः अनुभवेम ! एताः संस्पृशेम ! आसां सुगन्धञ्च जिघ्रेम ! भवन्तः अवलोकयन्तु ! अस्माकीनस्य आभ्यन्तरीणस्य व्यक्तित्वस्य विकासार्थमपि अस्मदीयस्य देशस्य एताः विशेषताः महत्याः पाठशालायाः कार्याणि इव प्रभवन्ति | अवकाश-दिनानि सन्ति, दीपावल्याः अवसरोऽस्ति, अस्मदीये देशे सर्वत्र कुत्रचित् कुत्रचिद् चापि पर्यटनस्य स्वभावोऽस्ति जनानाम्, जनाः पर्यटकत्वेन प्रयान्ति, इदञ्च स्वाभाविकमेव | परञ्च कदाचित् चिन्ता भवति यत् वयं अस्मदीयं देशन्तु नैव पश्यामः, देशस्य विविधताः नैव अवगच्छामः, नैव ईषदपि अवबुद्धामः, केवलं चाकचिक्य-प्रभावेण विदेशानां भ्रमणमेव अस्मभ्यं रोचते | भवन्तः कुर्वन्तु नाम विश्व-भ्रमणम्, काञ्चिदपि विप्रतिपत्तिं नैव धारयामि | परन्तु कदाचित् स्वीय-गृहमपि अवलोकयन्तु ! उत्तर-भारतस्य जनः नैव जानाति यत् दक्षिण-भारते किं

किमस्तीति ? पश्चिम-भारतस्य जनो न जानाति यत् पूर्व-भारते किञ्च वर्तते इति ? अस्मदीयोऽयं देशः कतिभिः विविधताभिः संभरितोऽस्ति !

महात्म-गान्धी, लोकमान्यः तिलकः, स्वामी विवेकानन्दः, अस्मदीयः पूर्व-राष्ट्रपतिः अब्दुल-कलामः चैतेषां जीवनचरितानि यदा पश्यामः तदा अनुभूयते यत् एतैः यदा भारत-भ्रमणं कृतं तदा ते भारतम् द्रष्टुम् अवगन्तुञ्च, एतदर्थञ्च जीवितुं मर्तुञ्च नूतनां काञ्चिद् प्रेरणाम् अलभन्त | एते सर्वेऽपि महापुरुषाः भारतस्य व्यापकं भ्रमणं कृतवन्तः | स्वीय-कार्यारम्भे एव ते भारतम् अवगन्तुं अवबोद्धुञ्च प्रायतन्त | आत्मना आत्मनि एव भारतं जीवितुं प्रयतितवन्तः | किं वयं अस्माकीन-देशस्य विभिन्नानां राज्यानां भिन्नानां समाजानां नाना-समूहानां तेषाञ्च रीति-परम्पराणां परिधान-पानाशनानां मान्यतानां च विद्यार्थित्वेन अवगमन-शिक्षण-जीवनार्थं प्रयतितुं नैव शक्नुमः ?

पर्यटने मूल्याभिवृद्धिः तदैव शक्यास्ति यदा वयं केवलं दर्शनार्थि-रूपेण नैव, अपि तु विद्यार्थि-रूपेण तद् अवगन्तुम् अवबोद्धुं निर्मातुञ्च प्रयतेम ! मम नैजः अनुभवः अस्ति | हिन्दुस्थानस्य पञ्च-शताधिक-ग्रामान् गन्तुम् अहम् अवसरान् अवाप्नुवम् | सार्ध-चतुश्शताधिकाः जनपदाः तादृशाः वर्तन्ते, यत्राहं रात्रि-विश्रमम् अकरवम् | तथा चाद्य, यदाहं भारते एतद्दायित्वं निर्वाहयामि, तदा मम तत्कालीनस्य भ्रमणस्य अनुभवाः अतितरां सहायिनो भवन्ति | वस्तूनि अञ्जसा अवगन्तुम् अहं बहु-सौविध्यम् अनुभवामि | भवद्भ्यः साग्रहं निवेदयामि यत् भवन्तः विशाल-भारतस्य "विविधतासु एकता" इति विपुलायाः शक्तेः भाण्डारमनुभवन्तु ! "विविधतासु एकता" इति मात्रं समाघोषः एव नैवास्ति | अत्र "एक-भारतम्, श्रेष्ठ-भारतम्" इति स्वप्नः संनिहितोऽस्ति | पानाशनयोः कियन्ति प्रकाराणि सन्ति ! सम्पूर्णेऽपि जीवने प्रतिदिनम् एकैकं नूतन-प्रकारकं व्यञ्जनम् अश्नुमहि चेदपि तेषां पुनरावृत्तिः नैव भविष्यति | एषास्ति अस्माकीन-पर्यटनस्य महती शक्तिः ! साग्रहं कथयामि यत् एतेषु अवकाश-दिनेषु भवन्तः केवलं गृहेभ्यः बहिः निर्गच्छेयुः, उताहो केवलं परिवर्तनार्थं प्रस्थानं कुर्युः इत्येव नैव, किञ्चित् अवगन्तुं प्राप्तुम्

अवबोद्धुञ्च अभिलक्ष्य बहिः निर्गच्छन्तु ! भारतम् स्वस्मिन् आत्मसात्कुर्वन्तु ! कोटि-कोटिशो जनानां विविधताः स्वस्मिन् अङ्गीकुर्वन्तु ! एतैः अनुभवैः भवतां जीवनं समृद्धं भविता | भवतां विचार-सरणी विशाला भविता | तथा च, अनुभवेभ्यः महत्तरः शिक्षकः को नाम अन्यो भवितुमर्हति ? सामान्यतया ओक्टोबरतः मार्च-मासीयः कालो हि पर्यटन-दृशा आधिक्येन अनुकूलो भवति | जनाः प्रयान्ति | नूनमहं विश्वसिमि यत् इतः परमपि भवन्तः यदि यास्यन्ति चेत् मम तदभियानम् अग्रेसारयिष्यन्ति | भवन्तः यत्र कुत्रापि यान्तु, स्वीयानुभवान् वितरन्तु, चित्राणि संप्रेषयन्तु, हैश- टैग-#incredibleindia - इत्यत्र भवन्तः चित्राणि अवश्यं प्रेषयन्तु | तत्रत्य-जनैः साकं मेलनं भवति चेत् तेषामपि चित्राणि प्रेषयन्तु | केवलं भवनानां चित्राणि वा प्राकृतिक-सौन्दर्यस्य चित्राणि नैव स्युः, तत्रत्य-जन-जीवनस्य कानिचित् कथ्यानि लिखन्तु | निजयात्रायाः विषये समुचितान् निबन्धान् लिखन्तु | Mygov - इत्यत्र प्रेषयन्तु, NarendraModiApp - इत्यत्रापि प्रेषयन्तु | अहं चिन्तयामि यत् भारतस्य पर्यटनं प्रोन्नेतुं किं वयं निज-राज्यस्य उत्तमोत्तमानि सप्त पर्यटन-स्थलानि निश्चेतुं शक्नुमः ? प्रत्येकमपि हिन्दुस्थानी निज-राज्यस्य तानि सप्त उत्तमोत्तमानि स्थलानि अवश्यं अवगच्छेयुः | शक्यते चेत् तदा तानि सप्त-स्थलानि अवश्यं गन्तव्यानि | किं भवन्तः तद्विषयिणीं काञ्चिदपि सूचनां प्रदातुं शक्नुवन्ति ? NarendraModiApp- इत्यत्र तां स्थापयितुं शक्नुवन्ति? #IncredibleIndia - चेत्यत्र स्थापयितुम् अर्हन्ति किमु? भवन्तः पश्यन्तु, अन्यतरस्य राज्यस्य सर्वेऽपि जनाः यदि एवं सूचयिष्यन्ति चेत् तदा, अहं प्रशासनाय आदेक्ष्यामि यत् तत् आसां सूचनानां सूक्ष्मेक्षिकया निरीक्षणं कृत्वा कानि वा तानि सप्त तथ्यानि सामान्यत्वेन प्रत्येकमपि राज्यात् अधिगतानि- इति विनिश्चित्य तदाधारेण तेन प्रचार-साहित्यं सन्नद्धीकरणीयम् | अर्थात् जनानाम् अभिप्रायाधारेण पर्यटन-स्थलानां संवर्धनं केन प्रकारेण स्यादिति परिशीलनीयम् | तद्वदेव, भवन्तः सम्पूर्णेऽपि देशे यावन्ति स्थलानि अवलोकितवन्तः, तेषु सर्वोत्तमानि यानि भवन्तः परिगणयन्ति, भवन्तः वाञ्छन्ति यत् अवश्यमेव जनाः तत्र गच्छेयुः,

नूनम् एतेषां विषये ते अवगच्छेयुः, तर्हि नूनं स्वीय-रुचेः अनुकूलानाम् एतेषां सप्त-स्थानानां विवरणमपि MyGov- इत्यत्र, NarendraModiApp - चेत्यत्र प्रेषयन्तु ।भारत-सर्वकारः ताः सूचनाः आधृत्य कार्याणि समाचरिष्यति । एतेषां सर्वोत्तमानां पर्यटन-स्थालानां विषये चल-चित्र-निर्माणम्, दृश्याङ्कनम्, प्रचार-साहित्य-निर्माणम्, तत्-संवर्धनञ्चेत्यादि । भवद्भिः चितानि वस्तूनि प्रशासनम् अवश्यं स्वीकरिष्यति । आगच्छन्तु ! मया साकम् आत्मानं संयोजयन्तु ! ऐषमः ओक्टोबरतः मार्च-मासं यावत् समयम् उपयोक्तुं देशस्य च पर्यटनं संवर्धयितुं भवन्तः अपि विशिष्टाभिकर्तृत्वेन भवितुमर्हन्ति । अहं भवतः निमन्त्रयामि ।

मम प्रियाः देशवासिनः ! मानवरूपेण अहमपि अनेकैः वस्तुभिः प्रभावितो भवामि । तानि ममापि हृदयम् आन्दोलयन्ति । मम मानसमपि गभीरतया प्रभवति । अहमपि परमार्थेन भवादृशः एव मानवः अस्मि । विगतेषु दिनेषु तादृशी एका घटना घटिता यस्याः विषये स्यात् भवन्तः अपि अवगताः स्युः ! महिला-शक्तेः देश-भक्तेः च अतुलनीयोदाहरणं देशवासिभिः अवलोकितम् । भारतीय-सेनाभिः लेफ्टिनेंट-स्वातिः निधिश्चेति वीराङ्गना-द्वयं लब्धम्, एते असामान्ये वीराङ्गने स्तः । स्वातिः निधिः च असामान्ये यतो हि भारत-मातुः सेवां कुर्वन्तौ अनयोः पत्यौ हुतात्मनौ संवृत्तौ । वयं कल्पयितुं शक्नुमः यत् एतावति अल्पे एव वयसि यदा संसारः निराधारो भवति तदा मनःस्थितिः कीदृशी भवति ? परञ्च, हुतात्मनः कर्नल-सन्तोष-महादिकस्य पत्नी स्वाति-महादिकः कठिनामेनां परिस्थितिं सम्मुखी-कुर्वन्ती मनसा निश्चितवती यत् सा भारतीय-सेनासु संप्रवेक्ष्यति । एकादश-मास-पर्यन्तं सा कठिनं परिश्रम्य प्रशिक्षणमवाप्नोत् । तथा च, स्वीय-पत्युः स्वप्नान् पूरयितुं सा निज-जीवनं समार्पयत् । तद्वदेव, निधि-दुबे-इत्यस्याः वीराङ्गनायाः पतिः मुकेश-दुबेः सेनासु नायकत्वेन कार्यनिरतः मातृभूमिं सेवमानः हुतात्मा संवृत्तः । तस्य अर्धाङ्गिनी निधिः मनसि निरणैषीत् यत् सा सेनाभ्यः स्वीय-सेवाः अर्पयिष्यति । प्रत्येकमपि देशवासी अस्मदीयाम् एनां मातृ-शक्तिं प्रति, अस्मदीयाः वीराङ्गनाः च प्रति आदरभावार्पणं कुर्यादिति तु सुतरां स्वाभाविकम् ।

अहमस्मै भगिनी-द्वयाय हृदयेन भूरिशो वर्धापयामि | एते देशस्य कोटि-कोटि-जनानां कृते नूतनां प्रेरणाम्, अभिनवाञ्च चेतनां प्रादत्ताम् | एताभ्यां भगिनीभ्यां भूरिशः अभिनन्दनानि विलसन्तुतराम् |

मम प्रियाः देशवासिनः ! नवरात्रोत्सवस्य दीपावल्ल्याः च मध्ये अस्मदीय-युव-प्रसूतेः कृते महान् अवसरः समुपागतोऽस्ति | FIFA under-17- इति ऊन-सप्त-दशवर्षीयाणां विश्व-चषक-स्पर्धाः देशे आयोज्यन्ते | दृढं विश्वसिमि यत् सर्वत्र पाद-कन्दुक-क्रीडायाः अनुगुञ्जनं श्रोष्यते | प्रत्येकमपि प्रसूतिः पाद-कन्दुक-क्रीडासु वर्धित-रुचयः भविष्यन्ति | हिन्दुस्थानस्य न कस्यापि विद्यालयस्य महाविद्यालयस्य वा प्राङ्गणं तादृशं भवेत् यत्र अस्मदीयाः एते नवयुवकाः सततं क्रीडानिरताः न भवेयुः | आगच्छन्तु ! यदा अशेष-विश्वं भारत-भूमौ क्रीडितुं समागच्छति, वयमपि क्रीडां निज-जीवनस्य अभिन्नाङ्गत्वेन स्वीकरवाम !

मम प्रियाः देशवासिनः ! नवरात्र-पर्व प्रचलति | जनन्याः भगवत्याः दुर्गायाः पूजावसरो लभ्यते | अशेष-परिवेशः पवित्र-सुगन्धेन परिव्यापृतोऽस्ति | परितः आध्यात्मिकतायाः परिवेशः, भक्त्युत्सवयोः च वातावरणं समुज्जृम्भते | एतत्-सर्वमपि शक्तेः साधनायाः पर्वत्वेन आमान्यते |कालोऽयं शारदीय-नवरात्र-रूपेण अभिज्ञायते | अस्मात् कालादेव शरदर्तोः शुभारम्भो भवति | नवरात्र-पर्वणः शुभेऽस्मिन् अवसरे अहं देशवासिभ्यः अनेकशो मङ्गल-कामनाः व्याहरामि, अपि च, भगवतीं पराम्बां प्रार्थयामि यत् देशस्य सामान्य-मानवस्य जीवनस्य आशाकाङ्क्षाणां पूर्तये अस्मदीयोऽयं देशः सर्वदैव नव-नवीनाः समुन्नतीः प्राप्नुयात् | प्रत्येकमपि समाह्वानं संमुखीकर्तुम् अयं समर्थः स्यात् | देशः द्रुत-गत्या अग्रेसरेत् | द्वाविंशोत्तर-द्विसहस्रतमं वर्षं हि भारतस्य स्वाधीनतायाः पञ्च-सप्तति-वर्ष-पूर्तिः, स्वाधीनतायाः समर्पित-सैनिकानां स्वप्नानां संपूर्तेः प्रयासः, सपाद-शत-कोटि-देशवासिनां संकल्पः, अनवरत-श्रमः, अपारं पुरुषार्थं साकारीकर्तुं पञ्च-वर्षात्मिकां योजनां निर्मीय वयं अगेसरेम, तथा च, भगवती शक्तिः अस्मभ्यः आशीराशिं प्रददयात् | भवद्भ्यः सर्वेभ्यः भूरि भूरि

शुभकामनाः | उत्सवम् अपि आयोजयन्तु, उत्साहमपि संवर्धयन्तु | भूरिशो धन्यवादाः !!!

----- भाषान्तर-कर्ता - डॉ. बलदेवानन्द-सागरः

दूरभाषः - ९८१० ५६२२ ७७

ईमेलः - baldevanand.sagar@gmail.com

***************************